**BACHELOR OF ARTS EXAMINATION, 2025**
**(2nd Year, 2nd Semester)**
**SANSKRIT(Honours)**
**Course: IX**
**(Epigraphy and Arthaśāstra)**

**Time: Two Hours** **Full Marks: 30**

***The figures in the margin indicate full Marks.***

१. **त्रयाणा**मुत्तरं सुरगिरा देवनागर्या लिप्या च लेखनीयम्। 1x3=3

क. उपधा कतिविधा?

ख. किं नाम गोदानम्?

ग. चतुर्वर्गाणां कस्य गुरुत्वं कौटिल्येन किमर्थं स्वीकृतम्?

घ. कामात् कोपाच्च के विनष्टा अभवन्?

ङ) प्रज्ञायाः कथं सामर्थ्यमुत्पद्यते?

२. निम्नोक्तेषु प्रश्नेषु **द्वयोः** समाधानं कार्यम्। 6x2=12

क. परविषये राजा तुष्टातुष्टान् कथं प्रसादयेत्? कृत्या-इत्यस्य कोऽर्थः? कृत्यानां स्वरूपं कैः ज्ञातव्यम्? 1+4+1

ख. राजपुत्ररक्षणे कौणपदन्तस्य किमभिमतम्? तेन कस्य पूर्वाचार्यस्य मतं खण्डितम्? कया युक्त्या च खण्डितम्? 2+2+2

ग. दिवसस्याष्टभागे राज्ञः कर्तव्याणि लेख्यानि। केन क्रमेण च राजा कार्याणि पश्येत्? 4+2

३. **त्रयाणा**मुत्तरं सुरगिरा देवनागर्या लिप्या च लेखनीयम्। 1x3=3

क. भट्टभवदेवस्य भुवनेश्वरप्रशस्तिः केन प्रणीता? तेन सह भट्टभवदेवस्य कः सम्बन्धः?

ख. भवदेवस्य अग्रजानुजयोर्नामनी लिख्येताम्।

ग. का आसीत् देवकी?

घ. सिद्धलग्रामो कीदृशः?

ङ) किमर्थं भट्टभवदेवस्य नाम वालबलभीभुजङ्गःअभवत्?

**४.** निम्नोक्तेषु प्रश्नेषु **द्वयोः** समाधानं कार्यम्। 6x2=12

क. भवदेवस्य वंशः कथं वंशेन सह उपमीयते?

ख. भट्टभवदेवः कीदृशो गुणयुक्तः आसीत्? हरिणा सह स कथं तुलनीयः? 3+3

ग. भट्टभवदेवेन निर्मितस्य जलाशयस्य वाप्याश्च वर्णनं देयम्। 3+3

******